# अभ्यास-प्रश्नपत्रम् - 2020-21 (Set -2)

**कक्षा - दशमी**

**संस्कृतम् (कोड-122)**

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**

• कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।

• कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।

• उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।

• अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**'अ' -भागः (बहुविकल्पात्मकः) 40 अङ्काः**

**'आ' - भागः (वर्णनात्मकः) 40 अङ्काः**

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ' - भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ' - भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(v) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vi) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**'अ'-भागः (40 अङ्काः)**

**(बहुविकल्पात्मकाः प्रश्नाः)**

| | **अनुप्रयुक्त-व्याकरणम्** | |
|---|---|---|
| **1** | **अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत (केवलं प्रश्नचतुष्टय)**<br>(i) **<u>नास्त्युद्यमसमो बन्धुः</u>** कृत्वा यं नावसीदति।<br>(क) नास्त्युद्यमसम+बन्धुः (ख) नास्त्युद्यमसमो+बन्धुः (ग) नास्त्युद्यमसमः+बन्धुः<br>(ii) कथं **<u>जनः+तं</u>** परितोषयिष्यति।<br>(क) जन्सतम् (ख) जनस्तम् (ग) जनास्ताम्<br>(iii) **<u>अश्वश्चेद्</u>** धावने वीरः भारस्य वहने खरः।<br>(क) अश्व+श्चेत् (ख) अश्वः+चेद् (ग) अश्वश् +चेद्<br>(iv) **<u>काचित्+इयमिति</u>** मत्वा व्याघ्रो भयाकुलचित्तो नष्टः। | **1x4=4** |

| | | |
|---|---|---|
| | (क) काचिदियमिति (ख) काचिदयमिति (ग) कादियमिति<br>(v) मुच्यते **महतः+भयात्।**<br>(क) महतभयात् (ख) महद्भयात् (ग) महतो भयात् | |
| **2** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) अयि चल बन्धो! **खगकुलकलरव** गुञ्जितवनदेशम्।<br>(क) खगकुलानां कलरवः (ख) खगकुल कलरवः (ग) खगकुलानि कलरवः<br>(ii) पुर-कलरव सम्भ्रमितजनेभ्यो **धृतसुखसन्देशम्**।<br>(क) धृतः सुखसन्देशः येन सः, तम्<br>(ख) धृतः सुखसन्देशः यं सः, तम्<br>(ग) धृतः सुखसन्देशः यः सः, तम्<br>(iii) **प्रस्तरतले** लतातरुगुल्मा नो भवन्तु पिष्टाः।<br>(क) प्रस्तर तले (ख) प्रस्तरस्य तलम् (ग) प्रस्तरस्य तले<br>(iv) प्रस्तरतले **लतातरुगुल्मा** नो भवन्तु पिष्टाः।<br>(क) लताः तरवः गुल्माः च (ख) लताः च तरुगुल्माः (ग) लताः च तरवः च गुल्माः च<br>(iv) **मानवाय जीवनं** कामये नो जीवन्मरणम्।<br>(क) मानवजीवनम् (ख) जीवनमानवस्य (ग) मानवजीवनाय | **1x4=4** |
| **3** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) **हरिततरूणां ललितलतानां माला रमणीया**।<br>(क) रमण+ईया (ख) रमणीय+टाप् (ग) रमणीय+ता<br>(ii) **वाष्पयानमाला सन्धावति वितरन्ती ध्वानम्।**<br>(क) वितरत्+ङीप् (ख) वितरन्+ङीप् (ग) वितरन्त्+ङीष्<br>(iii) **कुसुमावलिः समीरचालिता स्यान्मे वरणीया।**<br>(क) चल्+टाप् (ख) चालित+टाप् (ग) चालि+ता<br>(iv) **कुसुमावलिः समीरचालिता स्यान्मे वरणीया**।<br>(क) वरणीय+टाप् (ख) वरणीय्+आ (ग) वरणी+टाप्<br>(v) **तपोवनवासिनः देवी इति नाम्ना आह्वयन्ति**।<br>(क) देव+टाप् (ख) देव+ङीप् (ग) देव+णिनि | **1x4=4** |
| **4** | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम्)**<br>(i) निखिलः – आदित्य! किं त्वया ------------पठ्यते?<br>(क) गीताम् (ख) गीता (ग) गीतान्<br>(ii) आदित्यः- न, अहं तु स्वपाठं------------। | **1x3=3** |

| | | |
|---|---|---|
| | (क) पठ्यते (ख) पठामि (ग) पठ्यसे<br>(iii) निखिलः – शोभनम्! त्वं कदा गीतां-------?<br>(क) पठ्यते (ख) पठ्ये (ग) पठसि<br>(iv) आदित्यः –--------- तु प्रातःकाले एव गीताश्लोकानाम् अभ्यासः क्रियते।<br>(क) त्वया (ख) अहम् (ग) मया | |
| **5** | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम)**<br>(i) अहं दिवायां **(12:30)** ------------- भोजनं करोमि।<br>(क) सार्ध-द्वादशवादने (ख) सपाद-द्वादशवादने (ग) पादोन-द्वादशवादने<br>(ii) जाह्नवी सायं **(5:30)** ------------ खेलनाय गच्छति।<br>(क) सार्ध-पञ्चवादने (ख) सपाद-पञ्चवादने (ग) पञ्चवादने<br>(iii) सुनीतिः प्रातः **(6:30)** ------------ योगासनं करोति।<br>(क) सार्ध-षड्वादने (ख) सपाद-षड्वादने (ग) पादोन-षड्वादने<br>(iv) सायं **(5:00)** -------------- अभिषेकः संगीतकक्षायै गच्छति।<br>(क) सपाद-पञ्चवादने (ख) सार्ध-पञ्चवादने (ग) पञ्चवादने<br>(v) निकुञ्जस्य पितामहः **(1:45)** ---------- शयनं करोति।<br>(क) सार्ध-द्विवादने (ख) सपाद-द्विवादने (ग) पादोन-द्विवादने | **1x4=4** |
| **6** | **वाक्यानुगुणम् उचिताव्ययपदं चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i) कोऽपि न जानाति---------कस्य किं भविष्यति।<br>(क) श्वः (ख) ह्यः (ग) इदानीम्<br>(ii) आरक्षी---------उच्चैः अहसत्।<br>(क) उच्चैः (ख) नीच्चैः (ग) च<br>(iii) ----------एका मञ्जूषा आसीत्।<br>(क) तत्र (ख) वृथा (ग) एव<br>(iv) ग्रामस्य आरक्षी ----------- आसीत्?<br>(क) यदि (ख) तर्हिः (ग) कुत्र | **1x3=3** |
| **7** | **अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्ध पदं विकल्पेभ्यः चिनुत-(केवलं प्रश्नत्रयम्)**<br>(i) त्वं चाकलेहं **<u>खादति</u>**।<br>(क) खादसि (ख) खादन्तु (ग) खादतु<br>(ii) सः **<u>वृक्षाः</u>** सिञ्चति।<br>(क) वृक्षान् (ख) वृक्षाः (ग) वृक्षौ<br>(iii) माता पिता च ग्रामं **<u>आगच्छन्ति</u>**।<br>(क) आगच्छसि (ख) आगच्छतः (ग) आगच्छति | **1x3=3** |

| | | |
|---|---|---|
| | (iv) भवान् ह्यः कुत्र <u>भविष्यति</u>।<br>(क) आसीत् (ख) आस्ताम् (ग) आसन् | |
| | **पठितावबोधनम्** | |
| **8** | **रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत-(केवलं प्रश्नपञ्चकम्)**<br>(i) तनयः **<u>छात्रावासे</u>** निवसन् अध्ययने सङ्लग्नः अभूत्।<br>(क) कस्य (ख) कुत्र (ग) केषाम्<br>(ii) **<u>पिता</u>** पुत्राय बाल्ये विद्याधनं यच्छति।<br>(क) का (ख) कदा (ग) कः<br>(iii) संसारे **<u>विद्वांसः</u>** ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते।<br>(क) के (ख) कस्य (ग) कस्याः<br>(iv) चौरः **<u>गृहाभ्यन्तरं</u>** प्रविष्टः।<br>(क) कः(ख) किम्(ग) कुत्र<br>(v) सुरभेः इमाम् **<u>अवस्थां</u>** दृष्ट्वा सुराधिपः ताम् अपृच्छत्।<br>(क) काम् (ख) कस्यै(ग) कैः<br>(vi) **<u>ऋषभः</u>** हलमूढ्वा गन्तुमसशक्तः क्षेत्रे पपात।<br>(क) काः (ख) के (ग) कः | **1x5=5** |
| **9** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत-(केवलं प्रश्नचतुष्टयम्)**<br>(i) तथापि दुर्बले **<u>सुते</u>** मातुः अभ्यधिका कृपा सहजैव।<br>(क) पुत्रे (ख) सूत्रे (ग) मित्रे<br>(ii) मार्गे गहने **<u>कानने</u>** सा एकं व्याघ्रं ददर्श।<br>(क) विशाले (ख) गृहे (ग) अरण्ये<br>(iii) सः ऋषभः गन्तुम् **<u>अशक्तः</u>** आसीत्।<br>(क) शक्तियुक्तः (ख) शक्तिहीनः (ग) शक्तिमान्<br>(iv) **<u>श्रृगालेन</u>** सहितं पुनरायातं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती।<br>(क) करिणा (ख) सिंहेन (ग) जम्बुकेन<br>(v) बहूनि अपत्यानि **<u>मे</u>** सन्तीति सत्यम्।<br>(क) माम् (ख) मयि (ग) मम | **1x4=4** |
| **10** | **भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत -(केवलं प्रश्नषट्कम)**<br>(i) "दुर्दान्तैः दशनैः" इत्यनयोः पदयोः किं विशेषणपदम्?<br>(क) दुर्दान्तैः (ख) दशनैः (ग) दुर्दान्तैः दशनैः<br>(ii) 'सा एकं व्याघ्रं ददर्श' इत्यस्मिन् वाक्ये 'ददर्श' इति क्रियापदस्य कर्तृपदं किम् ? | **1x6=6** |


| | | |
|---|---|---|
| | (क) एकम् (ख) व्याघ्रम् (ग) सा<br>(iii) "वाष्पयानमाला सन्धावति वितरन्ती ध्वानम्" अत्र क्रियापदं किम्?<br>(क) वाष्पयानमाला (ख) सन्धावति (ग) वितरन्ती<br>(iv) "गच्छ वत्से! सर्वं भद्रं जायेत" अत्र 'भद्रम्' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(क) ध्रुवम् (ख) आभद्रम् (ग) निमित्तम्<br>(v) "क्रुद्धः सिंहः वानरं प्रहर्तुमिच्छति" अस्मिन् वाक्ये किं विशेषणपदं प्रयुक्तम्?<br>(क) क्रुद्धः (ख) सिंहः (ग) वानरम्<br>(vi) "कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत" अत्र विशेषणपदं किम्?<br>(क) दुर्बलम् (ख) वृषभम् (ग) अवर्तत<br>(vii) "पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्" अत्र विशेषणपदं किम्?<br>(क) पिता (ख) महत् (ग) विद्याधनम्<br>(viii) "क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत्" अत्र 'बहुवारम्' इत्यर्थे किं पदं दत्तम्?<br>(क) एकवारम् (ख) द्विवारम् (ग) अनेकवारम् | |

**'आ' - भागः**

**वर्णनात्मकाः प्रश्नाः (40 अङ्काः)**

| अपठितावबोधनम् | | |
|---|---|---|
| **11** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**<br>कस्मिंश्चित् अधिष्ठाने चत्वारो जनाः परस्परं मित्रत्वम् आपन्नाः वसन्ति स्म। बालभावे तेषां मतिः अजायत-'भोः! देशान्तरं गत्वा विद्यायाः उपार्जनं करणीयम्'। अथ अन्यस्मिन् दिवसे जनाः परस्परं निश्चयं कृत्वा विद्योपार्जनाय कान्यकुब्जं (कन्नौजं) गताः तत्र च विद्यामठे गत्वा पठितुमारब्धवन्तः। एवं द्वादशवर्षाणि यावदेकचित्ततया पठित्वा विद्याकुशलास्ते सर्वे सञ्जाताः। ततः तैः चतुर्भिः मिलित्वा उक्तम् -'वयं सर्वविद्यापारङ्गताः' तदुपाध्यायम् पृष्ट्वा स्वदेशं गच्छामः। गुर्वादेशं प्राप्य सर्वे स्वदेशं प्रति गताः, यद्यपि विद्यापारङ्गतास्ते तथापि लोकव्यवहाराणां ज्ञानाभावात् हास्यपात्राः जाताः। अतः जीवने व्यवहारज्ञानं नूनमावश्यकमिति, केवलं शास्त्रज्ञानं हास्यकारणमेव भवति। कथ्यते अपि –<br>अपि शास्त्रेषु कुशलाः लोकाचारविवर्जिताः।<br>सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः॥ | 10 |
| | **अ एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) वयं कुत्र गच्छामः?<br>(ii) जीवने कीदृशं ज्ञानम् आवश्यकं भवति? | (1x2=2) |

| | | |
|---|---|---|
| | (iii) के कन्नौजं गत्वा अध्ययनं कुर्वन्ति?<br>**आ पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) चत्वारो जनाः किमर्थं देशान्तरं गन्तुम् इच्छन्ति?<br>(ii) जनाः कान्यकुब्जे कति वर्षाणि यावत् अधीतवन्तः?<br>(iii) सर्वे ते कुत्र यान्ति?<br>**इ अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**<br>**ई यथानिर्देशम् उत्तरत- (केवल प्रश्नत्रयम्)**<br>(i) 'यान्ति' इत्यस्याः क्रियायाः कर्तृपदं किम्?<br>(क) सर्वे (ख) जनाः(ग) कन्नौजम्<br>(ii) 'चत्वारः' इति पदस्य विशेष्यं गद्यांशात् चित्वा लिखत।<br>(क) मित्राणि (ख) वृक्षाः (ग) जनाः<br>(iii) 'दिवसे' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?<br>(क) दिने (ख) सन्ततेः (ग) मासे<br>(iv) अनुच्छेदे 'अनुक्तम्' पदस्य कः विपर्ययः आगतः?<br>(क) कथितम् (ख) उक्तम् (ग) दृष्टम् | <br>(2x2=4)<br><br><br><br>(1)<br>(1x3=3) |
| | **रचनात्मक कार्यम्** | |
| **12** | **विद्यालयस्य वार्षिकोत्सवं वर्णयन् मित्रं सौरभं प्रति लिखिते पत्रे उचितपदैः रिक्तस्थानानि पूरयत।**<br><br>(i)……….. दिल्ली<br>तिथिः 28.03.2020<br><br>प्रिय मित्रं (ii) …….!<br><br>नमो नमः,<br><br>अत्र कुशलं (iii)…………..। भवता लिखितं पत्रम् अद्यैव प्राप्तम्। अहं स्वविद्यालयस्य वार्षिकोत्सवं (iv)…………..। एकमासपूर्वमेव विद्यालयस्य सर्वे (v)…………… छात्राः(vi)……….. कार्येषु व्यस्ताः आसन्। शिक्षानिदेशकः कार्यक्रमस्य (vii)……….. आसीत्। सः विद्यालयस्य अतीव प्राशंसत् योग्येभ्यः छात्रेभ्यः च (viii)………….अयच्छत्। पितृभ्याम् (ix)…………..निवेदयामि।<br><br>भवतः (x)…….।<br><br>अभिनवः | 1/2x10=<br>5 |

| | | |
|---|---|---|
| | **मञ्जूषा**<br>अशोकनगरम्, मुख्यातिथिः, सुहृद्, नमस्कारान्, वर्णयामि, अध्यापकाः, पुरस्कारान्, तत्रास्तु, सौरभ। | |
| **13** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–**<br><br>**मञ्जूषा-**<br>अध्यापकः, छात्राः, चित्रम्, पाठयति, पठन्ति , श्रृण्वन्ति, पृच्छन्ति मानचित्रम्, उत्पीठिका, पुस्तकम्, मार्जनी। | **1x5=5** |
| | **अथवा**<br>**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**<br>"रामायणम्"<br>मञ्जूषा-<br>रामः, वाल्मीकिः, रचनाम्, आदिकाव्यस्य, संस्कृतकाव्यस्य, श्लोकाः अकरोत्, सप्तकाण्डेषु, चतुर्विंशतिसहस्राणि, विविधाः, पक्षाः | 1x5=5 |
| **14** | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूय लिखत - (केवल वाक्यपञ्चकम्)**<br>**1.** मैं गांव में रहता हूं। I live in the village<br>**2.** मेरे पिताजी अध्यापक है। My father is a teacher .<br>**3.** मेरी माता गृहिणी है। My mother is a homemaker. | 1x5=5 |

| | | |
|---|---|---|
| | **4.** वह रविवार को दिल्ली जाएगा। He will go to Delhi on Sunday.<br>**5.** तुम लोग वहाँ कब जाओगे। When will you go there.<br>**6.** कल वर्षा हो रही थी। It was raining yesterday.<br>**7.** सभी छात्र परीक्षा लिखेंगे। All students will write the exam. | |
| | **पठितावबोधनम्** | |
| **15** | **अधोलिखितं गद्याशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः। भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्-"अयि शुभे! किमेवं रोदिषि? उच्यताम्" इति। सा च -<br>विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिप।<br>अहं तु पुत्रं शोचामि, तेन रोदिमि कौशिक!॥<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) कः क्षेत्रकर्षणं करोति स्म?<br>(ख) कः दुर्बलः आसीत्?<br>(ग) दुर्बलो वृषभः कुत्र अपतत्?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) क्रुद्धः कृषीवलः किम् अकरोत्?<br>(ख) सुरभिः सुराधिपं किमवदत्?<br>(ग) सुराधिपः सुरभिं किमपृच्छत्? | 3<br><br>(1/2x2=1)<br><br>(1x2=2) |
| **16** | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**गुणी गुणं वेत्ति न वेत्ति निर्गुणो बली बलं वेत्ति न वेत्ति निर्बलः।**<br>**पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः॥**<br>**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) ) गुणी किं वेत्ति ?<br>(ii) सिंहस्य बलं कः न वेत्ति?<br>(iii) बलवान् किं जानाति?<br>**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(क) पिकः कस्य गुणं जानाति?<br>(ख) मूषकः किं न जानाति?<br>(ग) बलं को जानाति को वा न वेत्ति? | 3<br><br>(1/2x2=1)<br><br>(1x2=2) |

| | | |
|---|---|---|
| 17 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**सिंहः** - (क्रोधेन गर्जन्) भोः! अहं वनराजः। किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?<br>**एकः वानरः -** यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि?<br>**अन्यः वानरः-** किं न श्रुता त्वया पञ्चतन्त्रोक्तिः -<br>**योे न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।**<br>**जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः॥**<br>**काकः** - आम् सत्यं कथितं त्वया। वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।<br>**पिकः -** (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र 'का-का' इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपं न ध्वनिरस्ति। कृष्णवर्णं, मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्?<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) कः क्रोधेन गर्जति?<br>(ख) कः रक्षकः भवति?<br>(ग) 'किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?' इति कः कथयति?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) यः त्रस्तान् न रक्षति सः किं कथ्यते?<br>(ख) पिकः काकं वनराजरूपेण कथं न स्वीकरोति?<br>(ग) काकः किं वदति? | **3**<br><br>(1/2x2=1)<br><br>(1x2=2) |
| 18 | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -**<br>**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**<br>**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।1॥**<br>**अन्वयः** - पिता (i)............. बाल्ये महद् विद्याधनम्(ii)........... अस्य (पुत्रस्य) पिता (iii)....... तपः तेपे इत्युक्तिः(iv).......।<br>**मञ्जूषा-**<br>किम्, पुत्राय, तत्कृतज्ञता, यच्छति<br>**अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्यभावार्थे रिक्तस्थानानि पूरयित्वा पुनःलिखत -**<br>**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**<br>**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥**<br>**भावार्थः-** ...........संसारे (लोके) विद्वान् जनः एव......... भवति अर्थात् | (1/2x4=2)<br><br>1/2x4=2 |

| | | |
|---|---|---|
| | ज्ञानरूपिचक्षुः एव वास्तविकं नेत्रं अस्ति। .........जनस्य ज्ञानार्जने रुचिः न .............तस्य नेत्रे तु केवलं नाम्ना एव।<br>**मञ्जूषा**-<br>यस्य, नेत्रवान्, भवति, अस्मिन् | |
| **19.** | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत –**<br>(i) तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः।<br>(ii) करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।<br>(iii) कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्।<br>(iv) परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।<br>(v) एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः।<br>(vi) निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा।<br>(vii) एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः।<br>(viii) पदातिक्रमेण सञ्चलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। | 1/2x8=4 |